१ दायाद्येनाविभक्ते २ संसृष्टधने ३गोत्रजे ४संसृष्टभोजने च। "अपिव्रतास्त्वान्वारभन्ते यजमानमिति" का० ८,६, २६। "अपिव्रतास्त उच्यन्ते येषां यजमानव्रते अपित्वमस्ति दायाद्येनाविभक्ता इति" पितृभूतिः "अपिव्रता गोत्रजा इति कर्कभा०"अपिः संसर्गे संसृष्टं व्रतं कर्म्म येषामिति अपिव्रता अविभक्ता दायादाः तेह्येकेनापि कृष्यादि कर्म्म कृतं सर्वे उपजीवन्तीति हरिस्वामी, "व्रतं भोजनं यजमानेन सह प्राप्तभोजनाः बन्धुवर्गाः" इति माधवः।

**अपिशर्व्वर** त्रि० अपिः प्रादुर्भावे अव्ययी०बा०अच् समा०। १ शर्व्वरीमुखसमये प्रदोषकाले, "समिद्धमपिशर्वरे" इति ऋ० २,८,७,। "अपिशर्वरे शर्वरीमुखे" इति भा०।

**अपिशल** पु० अपिशलते अपि+शल—अच्।१ मुनिभेदे तस्यापत्यम् इञ्। आपिशलिः। शाब्दिकभेदे। "इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः। पाणिन्यमरजैनेन्द्राजयन्त्यष्टादिशाब्दिकाः" क०क० "तुम्यापिशलेः"इति पा०।

**अपिहित** त्रि० अपि+धा—क्त। १ आवृते "तच्छेनाभुरपिहित" इति श्रुतिः। अतोल्लोपे पिहितोऽप्यत्र "भुजङ्गपिहितद्वारमिति" रघुः।

**अपीच्य** त्रि० अपिच्यवते सौन्दर्य्याद्धीयते अपि+च्यु—ड अतोलोप उपसर्गदीर्घः न०त०। १ अतिसुन्दरे "अपीच्यदर्शनं सौम्यं सर्वलोकनमस्कृतमिति" वृह० "अपीच्यवेशं द्विभुजं सौम्याकारं सुदर्शनमिति" यममूर्त्तिलक्षणम्, अपि+अन्च—क्विप् अप्यङ् तत्र साधु यत् अञ्चतेरतोलोपे पूर्व्वदीर्घः। २ अन्तर्हिते। 'यदाविर्यदपीच्यं देवासो अस्ति दुष्कृतमिति" ऋ० ८,४७,१३, अपीच्यमन्तर्हितम् भा० ३ गुह्ये "मर्त्तानां मनुष्याणामपीच्यम्" ऋ० ८,२८,६, "अपीच्यं गुह्यमिति" भा०।

**अपिजू** त्रि० अपि+जव—क्विप्—ऊठ्। १ प्रेरके। "उषसानक्ता जगतामपीजुवा" ऋ० २,३१,५। "अपिजुवा प्रेरयित्र्य" इति वेदे उवङ् भा०।

**अपीत** त्रि० अपि+इण—क्त। १ विलयप्राप्ते विलीने, "सौम्य! तदा सम्पन्नोभवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतोभवतीति" शा०भा०धृता श्रुतिः। भावे क्त। १ विलये २ अपगमने न०। पीतवर्णभिन्ने पु० तद्वति त्रि०। पीतं पानकर्म्म २ तद्भिन्ने त्रि०।

**अपीति** स्त्री अपि+इण—क्तिन्। १ विलये २ अपगमे ३प्रलये च। "अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्" शा०सू०। आधारे क्तिन्। ४ संग्रामे। "पुरा यत् सूरस्तमसो अपीतेस्तमद्रिवः" इति ऋ० १,१२१,१०। "अपीतेः संग्रामादिति" भा०।

**अपीनस** पु० अपीनाय अपीनत्वाय सीयते कल्पते सो कर्म्मकर्त्तरि क। १ पीनसरोगे तद्विवरणं पीनसशब्दे।

**अपुंस्** पु० न पुमान् न०त०। १ नपुंसके क्लीवे। "पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः। समेऽपुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्य्यय इति" मनुः।

**अपुंस्का** स्त्री नास्ति पुमान् यस्याः उरःप्रभृतित्वात् कप्। १पतिशून्यस्त्रियाम्। 'नापुंस्कासीति मे मतिरिति' भट्टिः।

**अपुच्छा** स्त्री नास्ति पुच्छमग्रं यस्याः। १ शिखरहीने शिंशपावृक्षे। २पुच्छहीने त्रि०। [२ पुण्यशून्ये त्रि०।

**अपुण्य** न० न पुण्यं विरोधे न०त०। १ पापे। न०ब०।

**अपुण्यकृत्** त्रि० पुण्यं न करोति अपुण्यं पापं वा करोति। ताच्छील्ये क्विप् १ पुण्याकर्त्तरि २ पापकारिणि च। "क्षत्रियस्यैव वृत्तस्योवैश्यः शूद्रस्तथैव च। यः पिबेत् कपिलाक्षीरं न ततोन्योस्त्यपुण्यकृत्" आप० स्मृतिः।

**अपुत्र** पुंस्त्री नास्ति पुत्रोयस्य। १अजातपुत्रे २मृतपुत्रे च। "अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदेति" स्मृतिः "नापुत्रस्य लोकोऽस्ति" श्रुतिः। 'अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थितेति" वृहन्मनुः। "अपुत्रस्यैव या कन्या सैव पिण्डप्रदा भवेदिति" स्मृतिः पुत्रपदञ्च पुत्रपौत्रप्रपौत्रपरमिति दायभागादयः वा कप्। अपुत्रकोऽप्युक्तार्थे।

**अपुनर्** अव्य० न पुनः न०त०। पुनर्वारभिन्ने सकृदर्थे "अनानुकृत्यमपुनश्चकार" ऋ० १०,६८,१०।

**अपुनरावृत्ति** स्त्री न पुनः आवृत्तिः संसारगतिर्यतः ५ब०। निर्वाणमुक्तौ "न स पुनरावर्त्तते" इति श्रुतेस्तथात्वम्। ६ब०। पुनर्गमनशून्ये त्रि०। अर्थाभावे अव्ययी०। पुनरावृत्त्यभावे अव्य०।

**अपुनर्भव** पु० न पुनर्भवति संसारं भजतेऽस्मिन् भू—आधारे अप्। १ मोक्षे। करणे अप् न०त०। २ पुनर्भवाभावहेतौ तत्त्वज्ञाने अभावार्थे न०त०। पुनरुत्पत्त्यभावे पु० ३ प्रशमने निवारणे, 'रोगाणामपुनर्भवे। ज्ञानं चतुर्विधं यस्येति" वैद्यकम्। नास्ति पुनर्भवः पुनरुत्पत्तिरस्य ४ पुनर्जन्मशून्ये तत्त्वज्ञानवति मुक्ते।

**अपुराण** त्रि० विरोधे न०त०। १ पुराणभिन्ने नवीने।

**अपुष्ट** त्रि० पुष—कर्म्मणि क्त न०त०। १ अकृतपोषणे यस्य पुष्टिर्न कृता तस्मिन्।

**अपुष्टता** स्त्री अपुष्टस्य भावः तल्। अपुष्टदुष्क्रमग्राम्यव्याहता-